National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 205-207
© 2024 NJHSR
www.sanskritarticle.com

**डा. शिन्दे मनोज अंगद**
सहायकाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा. शिन्दे मनोज अंगद**
सहायकाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पञ्चाग्निविद्याप्रकरणानुसारं जीवस्य गत्यागतिविमर्शः

**डा. शिन्दे मनोज अंगद**

**शोधसारः**

अनादिवेदान्तविद्या प्रस्थानत्रयं समुपाश्रित्य निरन्तरायं गङ्गासरिदिव प्रवहतीति दार्शनिकानां नात्यन्तमेव तिरोहितम्। छान्दोग्योपनिषदः पञ्चमाध्याये श्वेतकेतुप्रवाहणसंवादोपन्यासेन पञ्चाग्निविद्या समुपदिष्टा। तत्र पञ्चाग्निविद्यायां जीवस्य गत्यागतिविचारो वितन्यते। तत्रायं निष्कर्षः यत् परम-पुरुषार्थतदुपायमात्रप्रतिपादनपरमपि वेदान्तदर्शनं वैराग्यरूपमन्तरङ्गसाधनम् उपपादयितुं पञ्चाग्नि-विद्योपदेशद्वारा जन्ममरणविचारं निरूपयतीति। तदर्था एव ब्रह्मसूत्रतृतीयाध्यायप्रथमपादस्यापि प्रवृत्तिः। इत्थं जीवस्य गत्यागतिविचारो वैराग्योत्पत्तये इति निरूप्य, छान्दोग्योपनिषद्युपदिष्टपञ्चाग्नि-विद्योपदेशानुसारं जीवस्य गत्यागतिविमर्शोऽस्मिन् शोधलेखे सप्रमाणं व्यधायि।

**कुञ्चिकाशब्दाः** - गत्यागतिः, जन्म, मरणम्, जीवः, उपासना, पञ्चाग्निविद्या, वैराग्यम्, द्युलोकः, धूमयानम्, देवयानम्, तादात्म्याध्यासः।

**उपोद्घातः**

परमपुरुषार्थस्य मोक्षस्य तदुपायस्य च प्राधान्येन प्रतिपादनात् वेदान्तदर्शनमेव दर्शनेषु दर्शनीयतमम्। मोक्षो नाम अविद्यानिवृत्त्युपलक्षिता परमानन्दावाप्तिः। स्वस्वरूपावस्थितिरेव मोक्षशब्देन व्यवह्रियते। स्वरूपावस्थानलक्षणस्य मोक्षस्य परमोपायस्तु ब्रह्मसाक्षात्कार एव। स च जीवब्रह्मैक्यलक्षण इति वेदान्तराद्धान्तः। अनाद्यविद्यानिमित्तात् कामकर्मवशाच्च जीवः स्वरूपेण ब्रह्माभिन्नोऽपि उपाधावनुप्रविष्टः जन्ममरणचक्रे सञ्चरति। अविद्यावशात् अनादिकालात् आत्मानात्मनोः इतरेतरतादात्म्याध्यासः सम्भवति। सच्चिदानन्दस्वरूपस्य आत्मनः प्रमातृत्वादिप्रतिपत्तिः अध्यासहेतुक एव। परमार्थतया सच्चिदानन्दविग्रहोऽपि अविद्यानिमित्तात् कर्तृत्वभोक्तृत्वाभिमानेन संसरति। तदुक्तं भगवत्पादशङ्कराचार्यैः शारीरकमीमांसाभाष्ये "मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्' 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः"[1] इति।

अथ विदितचरमेवैतदुपनिषत्सु बहुधा जन्ममरणविचारो वितन्यत इति। तत्र छान्दोग्योपनिषदः पञ्चमाध्याये श्वेतकेतुप्रवाहणसंवादमाश्रित्य पञ्चाग्निविद्यामुखेन जीवानां जननमरणचक्रमुपन्यस्तम्। द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपेषु पञ्चसु अग्नित्वबुद्धिं प्रकल्प्य क्रमेण जीवानामुत्क्रमणमभिहितम्। जीवैः अग्निहोत्रादिकर्मनिष्ठैः पुण्यकर्मकृद्भिः देवयानेन उत्तमः लोकः ईयते। तमोबहुलैः पापकर्मकृद्भिः अवरः लोकः संप्राप्यते। उत्तमावरलोकप्राप्तिरूपजन्ममरणविचारः वैराग्योत्पत्तिहेतुः इत्यतः जीवस्य गत्यागति-विचारः उपन्यस्यते ।

श्वेतकेतुप्रवाहणसंवादे राज्ञा प्रवाहणजैवलिना श्वेतकेतुं प्रति पञ्च प्रश्नाः पृष्टाः[2]। तेषां प्रश्नानां समाधानमुखेनैव विचारोऽयमारब्धः। ते च प्रश्नाः इत्थं सन्ति –

१) जीवः देहपातोत्तरम् अस्माल्लोकात् क्व गच्छति?

२) लोकान्तरं गच्छद्भिः जीवैः लोकेऽस्मिन् कथं प्रत्यागम्यते?

३) देवयानपितृयाणयोः पथोः किं विभागस्थानं भवति ?

४) नैके जीवाः पितृलोकं यान्ति अथापि सः लोकः कुतः न सम्पूर्णः?

५) पञ्चम्यामाहुतौ सत्यां सोमरसघृतादिरूपाः आपः पुरुषशरीरं कथमाप्नुवन्ति ?

पृष्टानां प्रश्नानां क्रममतिक्रम्य आद्यस्य प्रश्नचतुष्टयस्य आनुकूल्यञ्च परिकल्प्य पञ्चमः प्रश्नः 'पञ्चम्यामाहुतौ सत्यां सोमरसघृतादिरूपाः आपः पुरुषशरीरं कथमाप्नुवन्ति?' इति आदौ समाधीयते। बुद्धिकल्पितेषु द्युपर्जन्यादिषु अग्निषु समिदादयः पदार्थाः कल्प्यन्ते। यथा लौकिकभूताग्नौ समिदादयः स्वभावतया भवन्ति।

तत्र द्युलोकाख्ये अग्नौ देवाः यजमानं जुह्वति। ततश्च सूर्ये रश्मिषु अहनि चन्द्रे नक्षत्रेषु च विषयेषु क्रमेण समित् धूमः अर्चिः अङ्गारः विस्फुलिङ्गाः चेति दृष्टिः विधीयते। उक्तञ्च भगवत्या श्रुत्या "असौ वाव लोको गौतमाग्निः तस्यादित्य एव समिद्रश्मयो धूमः अहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः"[3] इति । अस्मिन् द्युलोकाग्नौ आहुतिः श्रद्धा एव भवति। तथा च सोमः भवति श्रद्धारूपेण हुतानामाहुतीनां परिणामः इति। अतः यजमानं जुह्वति श्रद्धाख्याहुतिविशेषेण द्युलोकाग्नौ इति अवगम्यते।

एवञ्च चन्द्रलोकाख्ये स्वर्गे सोमविशिष्टं यजमानं पर्जन्याग्नौ जुह्वति। अस्मिन् पर्जन्याग्नौ आहुतिः भवति नूतनदेहारम्भहेतुभूतः द्रव्यविशेषः सोमः। पर्जन्यश्च वृष्ट्यभिमानी देवताविशेषः। अभिप्रायः अयमस्ति सोमः श्रद्धारूपाणामपां परिणामभूतः, यच्च पर्जन्याग्नौ हूयते इति। तत्र श्रुतिस्तावत् "तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्याः आहूतेः वर्षं सम्भवति"[4] इति।

तात्पर्यं तावत् पर्जन्यद्वारा यजमानः भाविनं लोकं संसरति इति। पूर्ववत् अस्य च अग्नेः वाय्वादिरूपाः समिदादयः श्रुत्या अभिहिताः।

ततः वृष्टिरूपेण परिणतं यजमानं पृथिव्यां जुह्वति, तच्च अन्नाकारेण परिणम्यते। अन्नरूपेण परिणतं यजमानं पुरुषाग्नौ जुह्वति, तच्च रेतोरूपेण परिणम्यते । रेतोरूपं यजमानं योषाग्नौ जुह्वति, तच्च गर्भं प्रविश्य दशममासे पुरुषशरीरं प्राप्य संसारचक्रे आवर्तते। तदुक्तं श्रुतौ "तस्मिन्नेतस्मिन्नग्नौ देवाः रेतो जुह्वति तस्याः आहूतेः गर्भः सम्भवति"[5] इति। एवंप्रकारेण पञ्चम्याः आहुतेः परं सोमरसघृतादिरूपाः आपः पुरुषशरीरं लभन्ते।

पुनः 'जीवः देहपातोत्तरम् अस्माल्लोकात् क्व गच्छति?' इत्यस्य प्रश्नस्य समाधानं देवयानमार्गोपदेशेन विधीयते। पञ्चाग्निविदः (गृहस्थाः, तपस्विनः, वानप्रस्थाः) अन्ये च सगुणब्रह्मोपासकाः, एते सर्वे अपि देवयानेन मार्गेण हिरण्यगर्भलोकाख्यं ब्रह्मलोकं प्राप्नुवन्ति। तेषु येषां ब्रह्मसाक्षात्कारः जातः, तेषां पुनरवरोहः न सम्भवति, अन्येषां भवत्येव। अपि च ये पञ्चाग्निविदः न सन्ति अर्थात् ये पञ्चाग्निविद्यायां न अभिरताः, ते स्वस्ववर्णाश्रमोचितकर्मसु व्यापृताः सन्तः धूमयानेन चन्द्रमसलोकं प्राप्नुवन्ति, ततः पुण्यकर्मक्षये सति पुनः मर्त्यलोकं प्राप्य स्वकर्मानुरूपं जन्म लभन्ते इति ।

'लोकान्तरं गच्छद्भिः जीवैः लोकेऽस्मिन् कथं प्रत्यागम्यते?' इत्यस्य प्रश्नस्य समाधानाय समाम्नायते "यथेतमाकाशम् आकाशाद्वायुं वायुर्भूत्वा धूमो भवति, धूमो भूत्वाभ्रं भवति, अभ्रं भूत्वा मेघो भवति यो रेतः सिञ्चति तद्भूय एव भवति, तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीया योनिमापद्येरन्"[6] इति। अनया श्रुत्या उच्यते चन्द्रमण्डले आरूढानां पुण्यकर्मिणां पुण्यकर्मक्षये सति ते चन्द्र-मण्डलात् भौतिकाकाशं, भौतिकाशाद्वायुम्, ततः धूमाभ्रमेघवृष्टिरूपेषु स्वल्पकालमुषित्वा वृष्टिद्वारा व्रीहियवादिसस्यशरीरं प्रविशन्ति, ततः व्रीहियवादिसस्यशरीरात् अन्नरूपेण पुरुषशरीरे प्रविश्य, रेतोरूपेण स्वल्पकालं स्थित्वा, ततः स्त्रीगर्भं प्रविश्य स्वकर्मानुरोधेन पुण्यकर्मफलभोगशरीरं पापकर्मफलभोगशरीरं वा लभन्ते। चन्द्रलोकप्राप्तिनिमित्तपुण्यकर्मक्षये सति चन्द्रमण्डलारूढाः जीवाः तदवरोहणविपरीतक्रमेण प्रत्यावर्तन्ते इति भगवता बादरायणव्यासेन प्रोक्तं यथा " कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च"[7] इति।

अथ देवयानपितृयाणयोः पथोः विभागस्थानं किमिति तृतीयप्रश्नः समाधीयते। ये पुण्यकर्मिणः ज्ञानकर्मनिष्ठाः उपासकाश्च ते देवयानेन पथा हिरण्यगर्भलोकं प्राप्नुवन्ति। ये च धूमयानेन पथा उद्गताः कर्मिणः ते चन्द्रमसलोकं स्वर्गलोकं वा स्वकर्मानुगुणं प्रतिपद्यन्ते। अतः कर्मिणाम् उपासकानां च स्वकर्मानुरूपफलावाप्तये अस्मादेव द्युलोकात् विभागो भवति। अतः देवयानपितृयाणमार्गयोः विभाग-स्थानं द्युलोक एव भवतीति तृतीयप्रश्नस्य समाधानं स्यात्।

अथ पितृलोकः कुतः न सम्पूर्यते इति चतुर्थप्रश्नः समाधीयते। श्रौतस्मार्तकर्मनिष्ठाः उपात्तपुण्यशेषाः जीवा एव पितृलोकं प्रतिपद्यन्ते। अनेकेषां पुण्यकर्मसु अधिकारे सत्यपि स्वभावदोषात् अल्पानामेव तत्र यथाशास्त्रं प्रवृत्तिसम्भवात्, धूमयानमार्गस्थानां पुण्यकर्मक्षयनिमित्तात् स्वकर्मशेषानुसारेण जन्मप्राप्तये द्युलोकादव-रोहसम्भवात् पितृलोकः द्युलोको वा न सम्पूर्यते। पुनश्चोक्तं "अथैतयोः पथोः न कतरेणचन तानीमानि क्षुद्राणि असकृदावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्व इत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते" इति। इत्थं धूमयानमार्गगाः कर्मिणः जीवाः भूयो भूयः इहैव जन्ममरणरूपसंसारचक्रानुप्रविष्टा इति हेतोः तैरयं पितृलोको नैव सम्पूर्यते इति बोध्यम्।

**उपसंहारः**

पञ्चाग्निविद्यायाः ब्रह्मलोकप्राप्तिरूपमदृष्टं फलं श्रूयते यथा "अथ ह य एतानेवं पञ्चाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद"[8] इति। पञ्चाग्निविदः श्रैतकर्मनिष्ठाः पुण्याचाराः देहपातोत्तरं देवयानेन मार्गेण ब्रह्मलोकं यान्ति इत्युक्तत्वात् ब्रह्मलोकरूपम् अदृष्टं फलं तद्विद्यायाः अङ्गीक्रियते। किन्तु छान्दोग्योपनिषदः पञ्चाग्निविद्याप्रकरण-परीक्षणात् जीवस्य जन्ममरणविचारव्याजेन पञ्चाग्निविद्यामाश्रित्य संसारिणां वैराग्योत्पत्तिमेव भगवती श्रुतिः कामयते इत्यवगम्यते। तत्र हि "तस्मात् जुगुप्सेत"[9] इत्युक्तत्वात् पञ्चाग्निविद्यायाः परमं प्रयोजनं वैराग्योत्पत्तिरेव इति निश्चीयते।

**परिशीलितग्रन्थावलिः**

१. **ब्रह्मसूत्रशाङ्करभाष्यम् –** आचार्यजगदीशशास्त्री (सम्पादकः), वाराणसी, मोतीलाल बनारसीदास प्रकाशनम्, २००५।

२. **छान्दोग्योपनिषत् (शाङ्करभाष्ययुता)** - स्वामी विद्यानन्दगिरिः (व्याख्याता), ऋषिकेश, श्रीकैलासविद्या प्रकाशनम्, २००२।

३. **उपनिषद्भाष्यम् (खण्डः-१)** - एस्.सुब्रह्मण्यशास्त्री (सम्पादकः), वाराणसी, श्रीदक्षिणामूर्ति मठ प्रकाशनम्, २००४।

४. **उपनिषद्भाष्यम् (खण्डः-२,३)** - एस्.सुब्रह्मण्यशास्त्री (सम्पादकः), वाराणसी, श्रीदक्षिणामूर्ति मठ प्रकाशनम्, २००४।

**संदर्भ ग्रन्थ: -**

1. शाङ्करब्रह्मसूत्रभाष्यम्-(अध्यासभाष्यम्)
2. छान्दोग्योपनिषत्- ५.३.२
3. छान्दोग्योपनिषत्- ५.४.१
4. छान्दोग्योपनिषत्- ५.५.२
5. छान्दोग्योपनिषत्- ५.८.२
6. छान्दोग्योपनिषत्- ५.१०.५-७
7. ब्र.सू ३.१.२
8. छान्दोग्योपनिषत्- ५.१०.१०
9. छान्दोग्योपनिषत्-